শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫২

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫২

### ৱতসাপহারৱর্ণনম্

অন্যাৱতারনিকরেষ্ৱনিরীক্ষিতং তে
    ভূমাতিরেকমভিৱীক্ষ্য তদাঘমোক্ষে।
ব্রহ্মা পরীক্ষিতুমনাঃ স পরোক্ষভাৱং
    নিন্যেথ ৱতসকগণান্ প্রৱিতত্য মাযাম্॥ ১ ॥

ৱতসানৱীক্ষ্য ৱিৱশে পশুপোতকরে তা-
    নানেতুকাম ইৱ ধাতৃমতানুৱর্তী।
ত্ৱং সামিভুক্তকবলো গতৱাংস্তদানীং
    ভুক্তাংস্তিরোধিত সরোজভৱঃ কুমারান্॥ ২ ॥

ৱতসাযিতস্তদনু গোপগণাযিতস্ত্ৱং
    শিক্যাদিভাণ্ডমুরলীগৱলাদিরূপঃ।
প্রাগ্ৱদ্ৱিহৃত্য ৱিপিনেষু চিরায সাযং
    ত্ৱং মাযযাথ বহুধা ৱ্রজমাযযাথ॥ ৩ ॥

ত্ৱামেৱ শিক্যগৱলাদিমযং দধানো
    ভূযস্ত্ৱমেৱ পশুৱতসকবালরূপঃ।
গোরূপিণীভিরপি গোপৱধূমযীভি-
    রাসাদিতোসি জননীভিরতিপ্রহর্ষাত্॥ ৪ ॥

জীৱং হি কঞ্চিদভিমানৱশাতস্ৱকীযং
    মত্ৱা তনূজ ইতি রাগভরং ৱহন্ত্যঃ।
আত্মানমেৱ তু ভৱন্তমৱাপ্য সূনুং
    প্রীতিং যযুর্ন কিযতীং ৱনিতাশ্চ গাৱঃ॥ ৫ ॥

www.prapatti.com

এৱং প্ৰতিক্ষণৱিজৃম্ভিতহৰ্ষভাৰ-
নিশশেষগোপগণলালিতভূৰিমূৰ্তিম্।
ত্বামগ্ৰজোপি বুবুধে কিল ৱতসৰান্তে
ব্ৰহ্মাত্মনোৰপি মহান্ যুৱযোৰ্ৱিশেষঃ॥ ৬ ॥

ৱৰ্ষাৱধৌ নৱপুৰাতনৱতসপালান
দৃষ্টৱা ৱিৱেকমসৃণে দ্ৰুহিণে ৱিমূঢে।
প্ৰাদীদৃশঃ প্ৰতিনৱান্ মকুটাঙগদাদি-
ভূষাংশ্চতুৰ্ভুজযুজঃ সজলাম্বুদাভান্॥ ৭ ॥

প্ৰত্যেকমেৱ কমলাপৰিলালিতাঙগান
ভোগীন্দ্ৰভোগশযনান্ নযনাভিৰামান্।
লীলানিমীলিতদৃশঃ সনকাদিযোগি-
ৱ্যাসেৱিতান্ কমলভূৰ্ভৱতো দদৰ্শ॥ ৮ ॥

নাৰাযণাকৃতিমসঙ্খ্যতমাং নিৰীক্ষ্য
সৰ্ৱত্ৰ সেৱকমপি স্বমৱেক্ষ্য ধাতা।
মাযানিমগ্নহৃদযো ৱিমুমোহ যাৱ-
দেকো বভূৱিথ তদা কবলাৰ্ধপাণিঃ॥ ৯ ॥

নশ্যন্মদে তদনু ৱিশ্বপতিং মুহুস্ত্ৱাং
নত্বা চ নূতৱতি ধাতৰি ধাম যাতে।
পোতৈঃ সমং প্ৰমুদিতৈঃ প্ৰৱিশন্ নিকেতং
ৱাতালযাধিপ ৱিভো পৰিপাহি ৰোগাত্॥ ১০ ॥

**********